# Ribhuproktam Brahmatarpanavarnanam

# ઋભુપ્રોક્તં બ્રહ્મતર્પણવર્ણનમ્

## Document Information

Text title : Ribhuproktam Brahmatarpanavarnanam

File name : RRibhuproktaMbrahmatarpaNavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 10 | 2-27||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં બ્રહ્મતર્પણવર્ણનમ્

(ઇત્યેવં બ્રહ્મતર્પણમ્)
(ઋભુનિદાઘસંવાદે)
નિત્યતર્પણમાચક્ષ્યે નિદાઘ શ‍ृણુ મે વચઃ ।
વેદશાસ્ત્રેષુ સર્વેષુ અત્યન્તં દુર્લભં નૃણામ્ ॥ ૧૦.૧॥

- -

સદા પ્રપઞ્ચં નાસ્ત્યેવ ઇદમિત્યપિ નાસ્તિ હિ ।
બ્રહ્મમાત્રં સદાપૂર્ણં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨॥

સરૂપમાત્રં બ્રહ્મૈવ સચ્ચિદાનન્દમપ્યહમ્ ।
આનન્દઘન એવાહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૩॥

સર્વદા સર્વશૂન્યોઽહં સદાત્માનન્દવાનહમ્ ।
નિત્યાનિત્યસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૪॥

અહમેવ ચિદાકાશ આત્માકાશોઽસ્મિ નિત્યદા ।
આત્મનાઽઽત્મનિ તૃપ્તોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૫॥

એકત્વસઙ્ખ્યાહીનોઽસ્મિ અરૂપોઽસ્મ્યહમદ્વયઃ ।
નિત્યશુદ્ધસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૬॥

આકાશાદપિ સૂક્ષ્મોઽહં અત્યન્તાભાવકોઽસ્મ્યહમ્ ।
સર્વપ્રકાશરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૭॥

પરબ્રહ્મસ્વરૂપોઽહં પરાવરસુખોઽસ્મ્યહમ્ ।
સત્રામાત્રસ્વરૂપોઽહં દૃગ્દૃશ્યાદિવિવર્જિતઃ ॥ ૧૦.૮॥

યત્કિઞ્ચિદપ્યહં નાસ્તિ તૂષ્ણીં તૂષ્ણીમિહાસ્મ્યહમ્ ।
શુદ્ધમોક્ષસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૯॥

સર્વાનન્દસ્વરૂપોઽહં જ્ઞાનાનન્દમહં સદા ।

વિજ્ઞાનમાત્રરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૦॥

બ્રહ્મમાત્રમિદં સર્વં નાસ્તિ નાન્યત્ર તે શપે ।
તદેવાહં ન સન્દેહઃ ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૧॥

ત્વમિત્યેતત્તદિત્યેતન્નાસ્તિ નાસ્તીહ કિઞ્ચન ।
શુદ્ધચૈતન્યમાત્રોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૨॥

અત્યન્તાભાવરૂપોઽહમહમેવ પરાત્પરઃ ।
અહમેવ સુખં નાન્યદિત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૩॥

ઇદં હેમમયં કિઞ્ચિન્નાસ્તિ નાસ્ત્યેવ તે શપે ।
નિર્ગુણાનન્દરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૪॥

સાક્ષિવસ્તુવિહીનત્વાત્ સાક્ષિત્વં નાસ્તિ મે સદા ।
કેવલં બ્રહ્મભાવત્વાદિત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૫॥

અહમેવાવિશેષોઽહમહમેવ હિ નામકમ્ ।
અહમેવ વિમોહં વૈ ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૬॥

ઇન્દ્રિયાભાવરૂપોઽહં સર્વાભાવસ્વરૂપકમ્ ।
બન્ધમુક્તિવિહીનોઽસ્મિ ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૭॥

સર્વાનન્દસ્વરૂપોઽહં સર્વાનન્દઘનોઽસ્મ્યહમ્ ।
નિત્યચૈતન્યમાત્રોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૮॥

વાચામગોચરશ્ચાહં વાઙ્મનો નાસ્તિ કિઞ્ચન ।
ચિદાનન્દમયશ્ચાહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૧૯॥

સર્વત્ર પૂર્ણરૂપોઽહં સર્વત્ર સુખમસ્મ્યહમ્ ।
સર્વત્રાચિન્ત્યરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૦॥

સર્વત્ર તૃપ્તિરૂપોઽહં સર્વાનન્દમયોઽસ્મ્યહમ્ ।
સર્વશૂન્યસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૧॥

સર્વદા મત્સ્વરૂપોઽહં પરમાનન્દવાનહમ્ ।
એક એવાહમેવાહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૨॥

મુક્તોઽહં મોક્ષરૂપોઽહં સર્વમૌનપરોઽસ્મ્યહમ્ ।
સર્વનિર્વાણરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૩॥

સર્વદા સત્સ્વરૂપોઽહં સર્વદા તુર્યવાનહમ્ ।
તુર્યાતીતસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૪॥

સત્યવિજ્ઞાનમાત્રોઽહં સન્માત્રાનન્દવાનહમ્ ।
નિર્વિકલ્પસ્વરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૫॥

સર્વદા હ્યજરૂપોઽહં નિરીહોઽહં નિરઞ્જનઃ ।
બ્રહ્મવિજ્ઞાનરૂપોઽહં ઇત્યેવં બ્રહ્મતર્પણમ્ ॥ ૧૦.૨૬॥

- -

બ્રહ્મતર્પણમેવોક્તં એતત્પ્રકરણં મયા ।
યઃ શ્ૃણોતિ સકૃદ્વાપિ બ્રહ્મૈવ ભવતિ સ્વયમ્ ॥ ૧૦.૨૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં બ્રહ્મતર્પણવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૧૦ । ૨-૨૭॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 10 . 2-27..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita. Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Brahmatarpanavarnanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*